तुलस्यास्तद्दलार्द्धेन पुण्यं स्याद्विष्णुपूजने ॥
तुलसीगन्धमादाय यत्र गच्छति मारुतः ।
दिशो दश पुनात्याशु भूतग्रामांश्चतुर्विधान् ॥
तुलसीकाननोद्भूता छाया यत्र भवेन्मुने ! ।
तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे ॥
तुलसीवीजनिकरो यस्मिन् पतति वै मुने ! ।
तत् स्थानं परमं ज्ञेयं पितॄणां प्रीतिवर्द्धनम् ॥
यस्मिन् गृहे द्विजश्रेष्ठ ! तुलसीतलमृत्तिका ।
तत्रैव नोपसर्पन्ति भूतले यमकिङ्कराः ॥
तुलसीमृत्तिकालिप्तो यदि प्राणान् परित्यजेत् ।
यमेन नेक्षितुं शक्यो मुक्तः पापशतैरपि ॥
तुलसीमृत्तिकालिप्तं ललाटं यस्य दृश्यते ।
कुलं स्पृशति नो तस्य कलिर्मुनिवरोत्तम ! ।
यः कश्चित्तुलसीमूले कार्त्तिके केशवप्रियः ।
दीपं ददाति विप्रेन्द्र ! स लभेद्वैष्णवं पदम् ॥
तुलसीकाननञ्चैव गृहे यस्यावतिष्ठते ।
तद्गृहं तीर्थभूतं हि नायान्ति यमकिङ्कराः ॥
दर्शनं नर्म्मदायास्तु गङ्गास्नानं तथैव च ।
तुलसीवनसंसर्गः सममेतत्त्रयं स्मृतम् ॥
रोपणात् पालनात् सेवाद्दर्शनात् स्पर्शनान्नृणाम् ।
तुलसी दहते पापं वाङ्मनःकायसञ्चितम् ॥
तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्च्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥
पुष्करादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
वासुदेवादयो देवा वसन्ति तुलसीदले ॥
तुलसीमञ्जरीयुक्तो यस्तु प्राणान् विमुञ्चति ।
यमो न वीक्षितुं शक्तो युक्तः पापशतैरपि ॥"
इति पाद्मोत्तरखण्डम् ॥ * ॥
"यत्रैकस्तुलसीवृक्षस्तिष्ठति द्विजसत्तम ! ।
तत्रैव त्रिदशाः सर्व्वे ब्रह्मविष्णुशिवादयः ॥
केशवः पत्रमध्येषु पत्राग्रेषु प्रजापतिः ।
पत्रवृन्ते शिवस्तिष्ठेत् तुलस्याः सर्व्वदैव हि ॥
लक्ष्मीः सरस्वती चैव गायत्री चण्डिका तथा ।
शची चान्या देवपत्न्यस्तत्पुष्पेषु वसन्ति वै ॥
इन्द्रोऽग्निः शमनश्चैव नैरृतो वरुणस्तथा ।
पवनश्च कुबेरश्च तच्छाखायां वसन्त्यमी ॥
आदित्यादिग्रहाः सर्व्वे विश्वेदेवाश्च सर्व्वदा ।
वसवो मनवश्चैव तथा देवर्षयोऽखिलाः ॥
विद्याधराश्च गन्धर्व्वाः सिद्धाश्चाप्सरसस्तथा ।
तुलसीपत्रमाश्रित्य सर्व्वदा निवसन्ति वै ॥
छिन्दन्ति तृणजातीनि तुलसीमूलजानि वै ।
तद्देहस्था ब्रह्महत्याश्छिनोति तत्क्षणाद्धरिः ॥
ग्रीष्मकाले द्विजश्रेष्ठ ! सुगन्धैः शीतलैर्जलैः ।
तुलसीसेचनं कृत्वा नरो निर्व्वाणमाप्नुयात् ॥
चन्द्रातपं वा छत्रं वा तुलस्यै यस्तु यच्छति ।
त्रिंशतो निराघेषु स मुक्तः सर्व्वपातकैः ॥
वैशाखेऽच्छतधाराभिरद्भिर्यस्तुलसीं जनः ।
संचयेत् सोऽश्वमेधस्य फलं प्राप्नोति नित्यशः ॥
जटाभिस्तुलसीं दर्भैः संचयेद्यो नरोत्तमः ।
तस्य वेश्मनि विप्रर्षे ! लक्ष्मीर्भवति निश्चला ॥
गोमयैस्तुलसीमूले यः कुर्य्यादनुलेपनम् ।
सम्मार्ज्जनञ्च क ा तस्य पापप ं ष्ट्यु ॥

रजांसि तस्य यावन्ति दूरीभूतानि जैमिने ! ।
तावत्कल्पसहस्राणि मोदते ब्रह्मणा सह ॥
यद्धर्म्मकर्म्म कुरुते मनुजः पृथिव्यां-
नारायणप्रियतमां तुलसीं विना च ।
तत् सर्व्वमेव विफलं भवति द्विजेन्द्र !
मद्धेषणोऽपि न हि तुष्यति देवदेवः ॥
यस्य स्यात् तुलसीपत्रं मुखे शिरसि कर्णयोः ।
मृत्युकाले द्विजश्रेष्ठ ! तस्य स्वामी न भास्करिः ॥"
इति पाद्मे क्रियायोगसारः ॥ * ॥
"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
तुलसीपत्रतोये च योऽभिषेकं समाचरेत् ॥
गवामयुतदानेन यत् फलं लभते नरः ।
तुलसीपत्रदानेन तत् फलं कार्त्तिके सति ॥
तुलसीतोयकणिकां मृत्युकाले च यो लभेत् ।
रत्नयानं समारुह्य वैकुण्ठं स प्रयाति च ॥
त्रिकालं तुलसीपत्रं शुद्धं पर्य्युषितं सति ।
श्राद्धे व्रते वा दाने वा प्रतिष्ठायां सुरार्च्चने ॥
भूगतं तोयपतितं यद्दत्तं विष्णवे सति ।
शुद्धन्तु तुलसीपत्रं क्षालनादन्यकर्म्मणि ॥"*॥
तुलसीचयनदिननिषेधकालो यथा,—
"पूर्णिमायाममायाञ्च द्वादश्यां रविसंक्रमे ।
तैलाभ्यङ्गे च स्नातेन मध्याह्ने निशिसन्ध्ययोः ॥
अशौचेऽशुचिकाले च रात्रिवासान्वितेऽपि वा ।
तुलसीं ये च चिन्वन्ति ते छिन्दन्ति हरेः
शिरः ॥" * ॥
तुलसीस्पर्शनेन मिथ्याप्रतिज्ञायां मिथ्याशपथे च
दोषो यथा,—
"तुलसीं स्वकरे कृत्वा स्वीकारं यो न रक्षति ।
स याति कालसूत्रञ्च यावच्चन्द्रदिवाकरौ ॥
करोति मिथ्याशपथं तुलस्या यो हि मानवः ।
स याति कुम्भीपाकञ्च यावदिन्द्राश्चतुर्द्दश ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ।
तुलसीपत्रचयने मन्त्रो यथा,—
"मातस्तुलसि गोविन्दहृदयानन्दकारिणि ! ।
नारायणस्य पूजार्थं चिनोमि त्वां नमोऽस्तु ते ॥
कुसुमैः पारिजाताद्यैः सुगन्धैरपि केशवः ।
त्वया विना नैव तृप्तिं चिनोमि त्वामतः शुभे ॥
त्वया विना महाभागे समस्तं कर्म्म निष्फलम् ।
अतस्तुलसि देवि ! त्वां चिनोमि वरदा भव ॥
चयनोद्भवदुःखं यद्देवि ! ते हृदि वर्त्तते ।
तत् क्षमस्व जगन्मातस्तुलसि ! त्वां नमाम्यहम् ॥
कृताञ्जलिरिमान्मन्त्रान् पठित्वा वैष्णवो जनः ।
करतालत्रयं दत्त्वा चिनुयात्तुलसीदलम् ॥
शनैः शनैस्तथाकारैश्चीयते तुलसीदलम् ।
यथा न कम्पते शाखा तुलस्या द्विजसत्तम ! ॥
पत्राणां चयने विप्र ! भग्नशाखा यथा भवेत् ।
तथा हृदि व्यथा दिव्याह्वीयते तुलसीपतेः ॥"
इति पाद्मे क्रियायोगसारः ॥ * ॥
तुलसीकाष्ठमालाभाहात्म्यं यथा,—
"तुलसीकाष्ठनिर्म्माणमालां गृह्णन्ति ये नराः ।
पदे पदेऽश्वमेधानां लभते निश्चितं फलम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

"धात्रीफलतुलसीकाष्ठमाला कुङ्कुमसम्भवा ।
धार्य्या नित्यं प्रयत्नेन वैतद्भक्तस्य लक्षणम् ॥
हरिभक्तस्य तुलसीकुङ्कुमकाष्ठसम्भवा ।
सिद्धार्थमात्मनो माला पुरा कृष्णेन दर्शिता ॥"
इति पाद्मोत्तरखण्डम् ॥ * ॥
गणेशपूजने तुलसीनिषेधो यथा । तुलसीं प्रति
गणेशवाक्यम् ।
"पुष्पाणां सारभूता त्वं भविष्यसि मनोरमे ! ।
कलांशेन महाभागे ! स्वयं नारायणप्रिया ॥
प्रिया त्वं सर्व्वदेवानां कृष्णस्य च विशेषतः ।
पूजा विमुक्तिदा नृणां मम त्याज्या च सर्व्वदा ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥
तुलस्याः स्तवो यथा,—
नारायण उवाच ।
"वृन्दां वृन्दावनीं विश्वपूजितां विश्वपावनीम् ।
पुष्पसारां नन्दिनीञ्च तुलसीं कृष्णजीवनीम् ॥
एतन्नामाष्टकञ्चैतत् स्तोत्रं नामार्थसंयुतम् ।
यः पठेत्ताञ्च संपूज्य सोऽश्वमेधफलं लभेत् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
महादेवाय तस्याः पत्रदानफलं यथा,—
"गयाश्राद्धफलं दातुः पितॄणां परितोषदम् ।
तत्फलं स्याच्छतगुणं तुलसीपत्रदानतः ॥"
इति बृहद्धर्म्मपुराणे १० अध्यायः ॥*॥
तस्यास्तन्मञ्जर्य्याश्च हरिहरपूजने मुक्तिप्रदत्वं
पाद्मे देवदूतविकुण्डलसंवादे ।
"तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्च्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥"
इति श्रीहरिभक्तिविलासे ७ विलासः ॥*॥
तत्पत्रेण शक्तिपूजाविधिर्यथा,—
"वाजिदन्तकपत्रैश्च पुष्पौघैरपि चण्डिकाम् ।
तुलसीकुसुमैः पत्रैरर्च्चयेच्छ्रीविवृद्धये ॥"
इति श्रीकालिकापुराणे ६८ अध्यायः ॥*॥
अथ तुलसीग्रहणविधिः । वायुपुराणे ।
"अस्नात्वा तुलसीं छित्त्वा यः पूजां कुरुते नरः ।
सोऽपराधी भवेत् सत्यं तत् सर्व्वं निष्फलं भवेत् ॥"
तत्रादौ मन्त्रः । स्कान्दे ।
"तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया ।
केशवार्थं चिनोमि त्वां वरदा भव शोभने ॥
त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम् ।
तथा कुरु पवित्राङ्गि कलौ मलविनाशिनि ! ॥"
गारुड़े च ।
"मोक्षैकहेतो धरणीप्रशस्ते
विष्णोः समस्तस्य गुरोः प्रियेति ।
आराधनार्थं वरमञ्जरीकं
लुनामि पत्रं तु ‍ क्षमस्व ॥
उक्त्वा तुलसीं नत्वा चित्वा दक्षिणपाणिना ।
पत्राण्येकैकशो न्यस्येत् सत्पात्रे मञ्जरीरपि ॥"
तन्माहात्म्यञ्च स्कान्दे ।
"मन्त्रेणानेन यः कुर्य्याद् गृहीत्वा तुलसीदलम् ।
पूजनं वासुदेवस्य लक्षकोटिफलं लभेत् ॥"
किञ्च ।
"शालग्रामशिलार्च्चार्थं प्रत्यहं तुलसीक्षितौ ।